# संस्कृत-वार्ता:

दिनाङ्कः-03.05.2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी एवं अंगोलायाः राष्ट्रपतिः जोआओ लौरेंको इत्यनयोः मध्ये प्रतिनिधिमण्डल-स्तरीय-वार्तायाः अनन्तरं भारत-अंगोलादेशौ विभिन्न-सन्धिषु हस्ताक्षरितवन्तौ।
- प्रधानमन्त्रिणा मोदिना प्रोक्तं यत् भारतदेशः आतङ्कवादीनां तेषां समर्थकानाञ्च प्रतिकारार्थं प्रतिबद्धोऽस्ति।
- पहलगाम-आतङ्क्याक्रमणम् आलक्ष्य भारतेन पाकिस्तानदेशात् आयातोपरि तत्काल-प्रभावेण प्रतिबन्धः स्थापितः।
- मुम्बइय्यां वेव्स-शिखर-सम्मेलनावधौ सप्तवैश्विकसंस्थाभिः भारतीय- रचनात्मक-प्रौद्योगिकी-संस्थानेन सह विविध-सन्धिषु हस्ताक्षरितम्।
- अपि च,
- आई.पी.एल्. इत्येतस्यां क्रिकेट-स्पर्धा-मालिकायाम् अद्य बेङ्गलुरूनगरस्य एम्. चिन्नास्वामि-क्रीडाङ्गणे रॉयल-चैलेन्जर्स- बेंगलुरूदलम् चेन्नई-सुपर-किंग्स-दलेन समम् क्रीडिष्यति।

-------------------------------------------------------------------

<u>प्रधानमन्त्री-अंगोलाराष्ट्रपतिः</u>

भारत-अंगोलादेशौ अद्य कृषि-पारम्परिक-चिकित्सा-संस्कृतिसहितेषु विविधक्षेत्रेषु आदान-प्रदानं विहितवन्तौ। प्रधानमन्त्री नरेन्द्रमोदी एवं अंगोलायाः राष्ट्रपतिः जोआओ मैनुअल गोंकाल्वेस लौरेंको इत्यनयोः मध्ये नवदिल्ल्यां प्रतिनिधिमण्डल-स्तरीय-वार्तायाः एताः सन्धयः समभवन्। वार्ताहरैस्सह संवादक्रमे प्रधानमन्त्रिणा मोदिना प्रोक्तं यत् भारतदेशः आतङ्कवादीनां तेषां समर्थकानाञ्च प्रतिकारार्थं प्रतिबद्धोऽस्ति।

प्रधानमन्त्रिणा अवसरेऽस्मिन् अंगोलादेशस्य सेनायाः आधुनिकीकरणार्थं द्विशत-मिलियन-डालरमितात्मिकायै रक्षा-ऋण-सहायतायै अपि सहमतिः प्रकटिता।

श्री मोदिना प्रोदीरितं यत् भारत-अंगोलादेशौ वर्षेऽस्मिन् स्वकीय-राजनयिक-सम्बन्धानां चत्वारिंशत्तमाम् वर्षपूर्तिं समाचरतः। तेन अफ्रीकी-संघस्य अध्यक्षतायै अंगोलादेशाय स्वकीयाः शुभकामनाः प्रकल्पिताः। तेनोक्तं यत् भारतदेशाय अयं गर्वस्य विषयः यत् भारतस्य जी-विंशतिः अध्यक्षतायामेव

अफ्रीकी-सङ्घेन जी-विंशत्यां स्थायी-सदस्यता सम्प्राप्ता। प्रधानमन्त्रिणा सबलं प्रोदीरितं यत् भारत-अफ्रीकीसङ्घौ प्रगत्यां सहभागिनौ वर्तेते सहैव वैश्विक-दक्षिणस्य कीर्तिस्तम्भावपि स्तः। अंगोलायाः राष्ट्रपतिः ह्यः त्रिदिवसीय-राजकीय-भारतयात्रायै नवदिल्लीं सम्प्राप्तवान्। तेन सह उच्चस्तरीय- प्रतिनिधिमण्डलमपि समागतः, यस्मिन् नैके मन्त्रिणः, वरिष्ठाधिकारिणः, व्यापारिणः वार्ताहराश्च सम्मिलितास्सन्ति।

राष्ट्रपति-लौरेंको इत्येतस्य अद्य प्रातः राष्ट्रिय-राजधान्यां राष्ट्रपतिभवनस्य प्राङ्गणे औपचारिकं स्वागतं समभवत्। राष्ट्रपतिः द्रौपदी-मुर्मुः प्रधानमन्त्री नरेन्द्र मोदी च अंगोला-राष्ट्रपतेः स्वागतं कृतवन्तौ। वार्ताहरैस्सह संवादक्रमे राष्ट्रपतिः लौरेंको इत्येषः प्रोक्तवान् यत् अष्टत्रिंशत्-वर्षेषु इयं प्रथमा राजकीय-यात्रा वर्तते अंगोलायाः कृते अयं महत्वपूर्ण-क्षणः वर्तते। अवसरेऽस्मिन् वार्ताहरान् सम्बोधयन् विदेशमन्त्रालयस्य सचिवः दम्मू रविः विज्ञापितवान् यत् अंगोलादेशः भारतात् रक्षोपकरणानि क्रेष्यति।

-------------------------------------------------------------------

<u>प्रधानमन्त्री-राष्ट्रिय-बालपुरस्कारः</u>

पञ्चविंशत्यधिक-द्विसहस्रतमवर्षस्य प्रधानमन्त्री-राष्ट्रिय-बालपुरस्कारेत्यस्य नामाङ्कनं सम्प्रति पञ्चवर्षात् अष्टादश-वर्षीय-बालकानां कृते उद्घाटितम् अस्ति। प्रधानमन्त्री-राष्ट्रियबालपुरस्कारः भारतस्य राष्ट्रपतिना प्रतिवर्षं देशे बालानाम् असाधारणोपलब्धीनां कृते मान्यता प्रादानाय प्रदीयते। एषः प्रतिष्ठितः राष्ट्रस्तरीयः पुरस्कारः अस्ति। एषः पुरस्कारः

तेभ्यः बालकेभ्यः प्रदीयते ये वीरता-समाजसेवा-पर्यावरण-क्रीडा-कला-संस्कृति-विज्ञान-प्रौद्योगिकी-चेत्यादिषु वर्गेषु उत्कृष्टतां प्रदर्शयन्ति। नामाङ्कनप्रदानस्य अन्तिमातिथिः जुलाई-मासस्य एकत्रिंशत्-दिनाङ्कमस्ति।

---

**पाकिस्तान-आयातप्रतिबन्धः**

**भारतेन पाकिस्तानदेशात् प्रत्यक्षाप्रत्यक्षरुपेण आयातोपरि तत्काल-प्रभावेण प्रतिबन्धः स्थापितः। विदेश-व्यापार-महानिदेशालयेन एकस्यां अधिसूचनायां प्रोक्तं यत् पाकिस्तानदेशात् आयात-निर्यातानां प्रत्यक्षाप्रत्यक्षवस्तूनां नयनानयने तत्कालप्रभावेण प्रतिबन्धः स्थापयिष्यते। एतस्मिनुक्तं यत् एषः प्रतिबन्धः राष्ट्रिय-सुरक्षां सार्वजनिक-नीतिञ्च समुद्दिश्य संस्थापितः। पहलगाम-आतङ्क्याक्रमणम् आलक्ष्य भारतेन पाकिस्तानदेशात् सर्वासु श्रेणिषु पत्रव्यवहाराणां प्रेष्यवस्तूनाञ्च आदान-प्रदानं स्थगितम् ।**

-----------------------------------------------------------------

वैष्णव-सञ्चार-मनोरञ्जन

सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः उक्तवान् यत् भारतं सञ्चार-मनोरञ्जनक्षेत्रे वैश्विक-नेतृत्वं कर्तुं शक्नोति। सः अवदत् यत्, नैकाः वैश्विकसंस्थाः अस्मिन् विषये भारतेन सह कार्यं कर्तुं इच्छन्ति। अद्य मुम्बईनगरे वेव्स-शिखरसम्मेलनावधौ गूगल-मेटा-माइक्रोसॉफ्ट-इत्यादयः सप्त वैश्विक संस्थाः भारतीय-क्रिएटिव-टेक्नोलॉजी-आईआईसीटी इत्यनेन सह सन्धिपत्रे हस्ताक्षरं कृतवत्यः। चतुःशत-कोटिरूप्यकाणां वित्तपोषणेन मुम्बईनगरे आईआईसीटी स्थापिता भविष्यति। अस्मिन् अवसरे प्रवदन् श्रीवैष्णवः अवदत् यत् आगामिषु दिवसेषु आईआईसीटी, आईआईटी, आईआईएम एतादृशाः संस्थाः अपूर्वादर्शं स्थापयिष्यन्ति।

-------------------------------------------------------------------

## गोवा-दुर्घटना

गोवायाम् अद्य बिचोलिम्-नगरस्य शिरगाव-ग्रामे श्री लैराई-जात्रा-महोत्सवे जनसंघस्य अनियन्त्रितत्वात् षट्-जनाः मृताः, अशीतितोप्यधिकाः जनाः च व्रणिताः। व्रणितानां चिकित्सा बिचोलीम-आरोग्यकेन्द्रे, मापुसा-मण्डलीय-चिकित्सालये, गोवा-चिकित्सा-चिकित्सालये च जायमाना वर्तते। अद्य प्रातःकाले एषा घटना अभवत् यदा सहस्राधिकाः भक्ताः मन्दिरे पुरातन- परम्परायाः साक्षित्वेन भागं ग्रहीतुं एकत्रिताः, यत्र नग्नपदाः 'धोण्ड्'-जनाः ज्वलन्त-अङ्गारेषु चलन्ति। मुख्यमन्त्री डॉ. प्रमोद-सावन्त मापुसा-मण्डलीय चिकित्सालयं गत्वा व्रणितैः सह मिलितवान्। प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपतिः द्रौपदी मुर्मुः च घटनामालक्ष्य दुःखं प्रकटितवन्तौ।

------------------------------------------------------------------

**मॉस्को रक्षा-रूस भ्रमणम् :**

**रक्षाराज्यमन्त्री संजयसेठः मई-मासस्य नवमे दिनाङ्के मास्को-विजय-दिवस-पथसञ्चलने भारतस्य प्रतिनिधित्वं करिष्यति। रक्षामन्त्रालयेन उक्तं यत् रक्षामन्त्री राजनाथसिंहस्य स्थाने श्रीसेठः रशिया-देशं गमिष्यति। पूर्वं विदेशमन्त्रालयस्य सूत्रेषु उक्तं यत्, रूसदेशेन प्रधानमन्त्री नरेन्द्रमोदी समारोहे आमन्त्रितम् आसीत्। परञ्च रशिया-देशेन पूर्वमेव सूचितं यत् रक्षामन्त्री भारतस्य प्रतिनिधित्वं पथसंचलन-समारोहे करिष्यति इति ।**

-------------------------------------------------------------------

<u>भाजपा-कांग्रेसदलम्</u>

भाजपादलेन अद्य कांग्रेसदलम् आक्षिप्तं यत् कांग्रेसदलम् राष्ट्रियसुरक्षां शिथिलीकरोति । सहैव कथितं यत् दलमिदं पाकिस्तानदेशस्य पक्षे वाक्यप्रपञ्चं कुर्वन्नस्ति। नवदिल्ल्यां वार्ताहरान् विज्ञापयता दलप्रवक्त्रा संबित-पात्रा इत्यमुना कांग्रेस-कार्यसमित्याः उपवेशनमुद्दिश्य आरोपितं यत् विपक्षीदलस्य आचरणं भारतं विहाय पाकिस्तानदेशस्य हितानुकूलम् आसीत्।

-----------------------------------------------------------------------

<u>भारतस्य ऋतु-विज्ञान-विभागेन</u>

भारतस्य ऋतु-विज्ञान-विभागेन उत्तर-पश्चिम-भारतस्य अनेकेषु भागेषु आगामिषु चत्वारि-पञ्च दिवसेषु वज्रपातेन, विद्युतद्योतनेन, ओलावृष्ट्या, तीव्रवायुना च सह वर्षा भविष्यति इति पूर्वानुमानितम्। पूर्वमध्यभारतयोः उपरि अपि मंगलवासरपर्यन्तं तथैव स्थितिः सम्भाव्यते। विभागस्यानुसारं उत्तरप्रदेशे, पञ्जाबे, हरियाणायां, चण्डीगढ़े च ओलावृष्टिः, तीव्रवायोः च सम्भावना विद्यते।

---

<u>आईपीएल</u>

आई.पी.एल्. इत्येतस्यां क्रिकेट-स्पर्धा-मालिकायाम् अद्य बेङ्गलुरूनगरस्य एम्. चिन्नास्वामि-क्रीडाङ्गणे रॉयल-चैलेन्जर्स- बेंगलुरूदलम् चेन्नई-सुपर-किंग्स-दलेन समम् क्रीडिष्यति। क्रीडैषा सायंकाले सार्धसप्तवादनतः क्रीडिष्यते। गतरात्रौ अहमदाबादनगरे गुजरात-टाइटन्स-दलेन सनराइजर्स- हैदराबाद-दलम् अष्टत्रिंशत्धावनाकैः पराजितम्।

॥ इति वार्ता ॥